# मणिका

## संस्कृत-अभ्यास-पुस्तकम्

### द्वितीयो भागः

### दशमश्रेण्यै





केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

आत्मीयच्छात्राः !

यदि कश्चित्/काचिद् भवन्तं भवतीं वा अनुचितरूपेण स्पृशति, सः च स्पर्शः भवत्कृते असहजः अस्वाभाविकः वा स्यात् तर्हि मौनं मा तिष्ठतु।

1. भवान् /भवती अहमेव 'दोषी/दोषिणी' इति मा चिन्तयतु।
2. यस्मिन्/यस्यां भवान् /भवती विश्वसिति, तं/तां सर्वं वृत्तं सूचयतु।
3. भवान्/भवती **पॉक्सो ई बॉक्स** माध्यमेन राष्ट्रिय-बालाधिकार-संरक्षणायोगमपि सूचयितुमर्हति।

**यदा भवन्तं भवतीं वा कश्चित्/काचित् अनुचितरूपेण स्पृशति तदा भवान्/भवती असहजम् अनुभवितुं शक्नोति। दुविधाग्रस्तः/दुविधाग्रस्ता भवान्/भवती असहायः/असहाया अहमिति अनुभवितुं शक्नोति परं तथा चिन्तयितुम् आवश्यकता नास्ति। यतः भवतः/भवत्याः कश्चित् दोषः नास्ति।**




**एतं पिञ्जं नुदतु।**

**पॉक्सो ई.बॉक्स NCPCR@gov.in इत्यत्र उपलभ्यते।**

नवसमाजं प्रति
Towards a new dawn

**यदि भवतः/भवत्याः आयुः अष्टादशवर्षेभ्यः न्यूनम् अस्ति, भवान्/भवती कस्याञ्चिद् विपदि अस्ति अथवा दुविधाग्रस्तः/दुविधाग्रस्ता अस्ति। भवता भवत्या वा साकं कश्चन दुर्व्यवहारः घटितः, भवान्/भवती कस्मिंश्चित् सङ्कटे अस्ति अथवा कञ्चिद् एतादृशं बालकं काञ्चिद् एतादृशीं बालिकां वा जानाति तदा....**

**1098 इत्यस्यां सङ्ख्यायां दूरवाणीं करोतु यतः केचन उत्तमाङ्काः जीवनं परिवर्तयन्ति।**




**बाल-सहायिका सङ्ख्या 1098 विपद्ग्रस्तेभ्यः बालेभ्यः अहर्निशं निःशुल्का राष्ट्रिया आपत्कालीना दूरवाणी-सेवा, महिला एवं बाल-विकास-मन्त्रालयस्य सहयोगेन चाइल्ड इंडिया फाउण्डेशन इति संस्थायाः प्रयासः अस्ति।**

नवसमाजं प्रति
Towards a new dawn

स्वच्छम् भारतम्
एकं पदं स्वच्छतां प्रति

# मणिका

## संस्कृत-अभ्यास-पुस्तकम्

### द्वितीयो भागः

### दशमश्रेण्यै





केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्



प्रथमं संस्करणम् : फरवरी 2007

द्वितीयं संशोधितं संस्करणम् : जून 2025

© CBSE

प्रकाशकः : निदेशकः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्
एकीकृत-कार्यालय-परिसरः, सैक्टर-23, फेस-1,
द्वारका, नई दिल्ली-110077

This book or part thereof may not be reproduced by any person or agency in any manner.

मुद्रकः आवरण-सज्जा च : **लक्ष्मी प्रिंट इंडिया**
556, जी.टी. रोड, शाहदरा, दिल्ली-110032

# पुरोवाक्

## ( द्वितीयं संशोधितं मुद्रितं संस्करणम् 2025 )

भारतस्य द्वे प्रतिष्ठे वर्तेते संस्कृतं संस्कृतिश्चेति। संस्कृतस्य महत्त्वं सुविदितमेव। संस्कृतिश्च जीवनस्य श्रेयो मार्गः। कस्याः अपि भाषायाः शिक्षणे श्रवणं, भाषणं, पठनं लेखनञ्च इत्येतेषु चतुर्षु कौशलेषु नैपुण्यम् अपेक्षितमेव भवति। परन्तु बहुभ्यः वर्षेभ्यः अथकप्रयत्नानन्तरम् अधुनापि विद्यालयेषु संस्कृतभाषायाः अध्यापनं यथा भवितव्यं तथा न जायमानं वर्तते। प्रायः सर्वत्रापि अनुवादमाध्यमेन अध्यापनं क्रियते। येन द्वादशकक्षामपि उत्तीर्णाः छात्राः न केवलं भाषणे, वाचने अपि तु स्वतन्त्रतया लेखनेऽपि काठिन्यमनुभवन्ति उत वा असमर्थाः भवन्ति। अत एव राष्ट्रियशिक्षानीतिः 2020 इत्यत्रापि विशेषेण भारतीयभाषाणां संस्कृतीनाञ्च संवर्धनाय बलं प्रदत्तं विद्यते।

एतदनुभूय एव विद्यालयेषु संस्कृतस्य शिक्षणार्थम् उपयुक्तपाठ्यपुस्तकाभ्यासपुस्तकयोः श्रव्यदृश्योपकरणानां च निर्माणे केन्द्रीयमाध्यमिकशिक्षासङ्घटनस्य शैक्षणिकविभागः निरन्तरमेव प्रयत्नशीलः विद्यते। एतदुद्दिश्य एव संस्कृतशिक्षणे सम्प्रेषणोपागममधिकृत्य अनेन सङ्घटनेन माध्यमिक-उच्चमाध्यमिककक्षाभ्यः चतुर्वर्षीयनवीनसंस्कृतपाठ्यक्रमस्य तदनुकूलपाठानां पुस्तकानां च विकासाय एका नवीना प्रायोजना उपस्थापिता। अस्यां प्रायोजनायाम् अभ्यासपुस्तकसहितं '**मणिका-द्वितीयो भागः**' इति नाम पाठ्यपुस्तकं द्वितीयपुष्परूपेण विकसितम्। नवीन-सामग्रीणां माध्यमेन विद्यार्थिनः संस्कृतभाषायां लेखनेन सह संस्कृतभाषणे अपि नैपुण्यं प्राप्स्यन्ति इति वर्तते पावनं लक्ष्यम्। संस्कृतस्य भाषिकतत्त्वानि अधिकृत्य व्याकरणस्य प्रायोगिकाभ्यासार्थम् इदम् अभ्यासपुस्तकं वर्तते। अस्य पुनः पुनः अभ्यासमाध्यमेन विद्यार्थिनः संस्कृतभाषायाः संरचनात्मकस्वरूपं ज्ञात्वा अस्याः व्यावहारिकरूपेण प्रयोगं कर्तुं समर्थाः भविष्यन्ति इति विश्वसिमि।

अस्यां मणिका-अभ्यासपुस्तकस्य सम्पादन-परियोजनायां यैः अभ्याससामग्रीनिर्माणसमिति-सदस्यैः अनवरतं परिश्रमः कृतः, ते नूनं साधुवादानर्हन्ति। पुनरपि एम. एल. खन्ना डी.ए.वी. पब्लिकविद्यालयः, द्वारका, नवदेहली इत्यस्य संस्कृतशिक्षकः श्रीअशोककुमारः, हंसराज मॉडल स्कूल, पञ्जाबीबाग, नवदेहली इत्यस्य सेवानिवृत्तः संस्कृतशिक्षकः डॉ. श्रीओमभारद्वाजः, अमृताविद्यालयम्, पुष्पविहारम्, नवदेहली इत्यस्य संस्कृतशिक्षकः श्रीउपेन्द्रकुमारमिश्रः इत्येतैः अभ्यासपुस्तक-संशोधनसमिति सदस्यैः अनवरतं परिश्रमः कृतः। कालानुगुणम् आवश्यकतानुसारं पुस्तकस्य निर्माणादारभ्य अधुनायावत् नैके विद्वांसः अस्य पुस्तकस्य संवर्धनं सम्पादनं च कृतवन्तः। अस्यां प्रायोजनायां यैः अभ्यासनिर्माणसमिति-सदस्यैः पुस्तकसंशोधनसमिति-सदस्यैश्च अनवरतं परिश्रमः कृतः ते सर्वेऽपि पौनः पुन्येन साधुवादार्हाः।

अस्य अभ्यासपुस्तकस्य पुनः प्रकाशनार्थं केन्द्रीयमाध्यमिकशिक्षाबोर्ड इति सङ्घटनस्य शैक्षणिक-निदेशिका-डॉ. प्रज्ञा एम. सिंह-महोदयायाः विशिष्टं योगदानं निश्चयेन उद्देश्यं पूरयति, अतः महोदयायाः कृतेऽपि भूयांसः धन्यवादाः।

अन्यैरपि च यैः महानुभावैः अस्य पुस्तकस्य समीक्षणाय मुद्रणाय च सहयोगः प्रदत्तः तान् सर्वान् प्रति केन्द्रीयमाध्यमिक-शिक्षासङ्घटनं नूनं स्वकृतज्ञतां ज्ञापयति।

शिक्षाजगति किमपि मौलिकं कर्म अथवा अन्यविधं कार्यं वा अन्तिममिति कथयितुं न शक्यते। यतः सर्वत्र काले काले परिष्कारस्य संस्कारस्य वा अवकाशः भवत्येव । अतः अस्य पुस्तकस्य संशोधनाय परामर्शाः अपेक्षिताः स्वागतार्हाः च।

राहुलसिंहः, आई.ए.एस.

अध्यक्षः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

# सम्प्रेषणाधारितः पाठ्यक्रमः

प्रायः आधुनिकविद्यालयेषु संस्कृतस्य अध्ययनम् अध्यापनं च अनुवादसाहाय्येन एव भवति। इदम् अनुभूयते यत् अनेन मार्गेण छात्राणां संस्कृतवाचन-लेखन-भाषणनैपुण्यं सन्तोषप्रदं न अस्ति। एतेषु नैपुण्यं प्राप्तुं भूयो भूयः अभ्यासस्य आवश्यकता वर्तते। मन्यते एव 'अभ्याससारिणी विद्या' इति ।

एतदुद्दिश्य केन्द्रीय-माध्यमिकशिक्षा-सङ्घटनेन भाषा-शिक्षणे सम्प्रेषणोपागममधिकृत्य माध्यमिक-उच्चमाध्यमिककक्षाभ्यः संस्कृतस्य चतुर्वर्षीयनवीन-पाठ्यक्रमहेतुना तदनुकूल-पाठ्यपुस्तकविकासाय एका प्रायोजना उपस्थापिता। अस्याः योजनायाः प्रमुखोद्देश्यानि सन्ति -

- राष्ट्रस्य सांस्कृतिकसमन्वये संस्कृतस्य भूमिकायाः उद्घाटनम्।
- छात्राणां मातृभाषायाः (अथवा क्षेत्रभाषायाः) संस्कृतस्य च मध्ये साम्यदर्शनम्।
- संस्कृतसाहित्ये निहितजीवनमूल्यानां प्रस्फुटनम्।
- संस्कृतवाचन-लेखन-भाषणनैपुण्यस्य विकासः।
- रुचिकरसामग्रीनिर्माणम् ।
- संस्कृते वस्तुनिष्ठ-उपयुक्त-मूल्याङ्कन-विधीनाम् आयोजनम् ।

अस्याः प्रायोजनायाः प्रमुखसोपानानि एतानि सन्ति-

(क) प्रथमचरणे पाठ्यपुस्तकस्य निर्माणम् ।

(ख) द्वितीयचरणे भाषिकतत्त्वाश्रिता कार्यपुस्तिका (अभ्यासपुस्तकम्)।

(ग) तृतीयचरणे संस्कृतध्वनिवैशिष्ट्यं विरामचिह्नवैशिष्ट्यं पाठ्यपुस्तकसामग्रीञ्च अधिकृत्य 'ऑडियोकैसेट्स' इति एषां निर्माणम्। (लिंग्वाफोनध्वनि-मुद्रिकापाठ्यपुस्तकम्)

(घ) अध्यापकनिर्देशिका इति चतुर्थचरणे ।

भाषा तु कौशलप्रधानविषयः। मन्यते यत् यथा जलतरणकौशलार्थं जलतरणम् एव उपायः तथैव वाचन-लेखन-भाषणेषु नैपुण्यं प्राप्तुं भाषायाः भूयो भूयः श्रवणम्, भाषणम्, वाचनम्, लेखनम् इत्येव उपायः। अतः भाषायाः शिक्षणस्य अधिगमनस्य च मूलं भाषिकतत्त्वानां भूयो भूयः अभ्यासे एव निहितम्। अस्य अभ्यासपुस्तकस्य निमार्णम् अनया दृष्ट्या एव कृतम्।

इदं विश्वस्यते यत् एतैः अभ्यासैः छात्राः संस्कृतमाध्यमेन सम्भाषणलेखनादिषु समर्थाः भविष्यन्ति। अस्मिन् अभ्यास-पुस्तके चित्राणां प्रचुरप्रयोगः कृतः येन विद्यार्थिनः प्रत्यक्षविधिना एव संस्कृतस्य प्रयोगं कर्तुं समर्थाः भवेयुः। अनुप्रयुक्तं व्याकरणम् एव एतेषाम् अभ्यासानाम् उद्देश्यम् अस्ति। छात्राः संस्कृतेन व्यवहारे सोत्साहाः भवेयुः इयम् एव कामना ।

**चांदकिरण सलूजा**

**संयोजकः**, पाठ्यसामग्री-निर्माण-समितिः (प्रथम-संस्करणस्य)

# मणिका-अभ्यासपुस्तकम् ( दशमश्रेण्यै )

## संशोधितं नूतनसंस्करणम् - 2025

### केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड-परामर्श-समितिः

- श्री राहुलसिंहः, आई.ए.एस., अध्यक्षः, केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली
- डॉ. प्रज्ञा एम. सिंह, निदेशिका (शैक्षणिक-विभागः), केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली

### पाठ्यसामग्री-निर्माणसमितिः सम्पादन-समितिः च ( संशोधित-नूतनसंस्करणस्य )

- श्री अशोककुमारः, एम एल खन्ना डी. ए. वी. पब्लिकविद्यालयः, द्वारका, नवदेहली (संयोजकः समन्वयकश्च)
- डॉ. श्रीओमभारद्वाजः, हंसराज मॉडल स्कूल पञ्जाबीबाग, नवदेहली (सेवानिवृत्तः)
- श्री उपेन्द्रकुमारमिश्रः, अमृता-विद्यालयम् पुष्पविहारम्, नवदेहली

### पाठ्यसामग्री-निर्माणसमितिः ( प्रथमसंस्करणस्य )

- श्री चांदकिरणसलूजा, प्राध्यापकः, शिक्षाविभागः, दिल्ली-विश्वविद्यालयः (संयोजकः) (सेवानिवृत्तः)
- डॉ. माणिकगोविन्दचतुर्वेदी, केन्द्रीय-हिन्दी-संस्थानम् (सेवानिवृत्तः)
- श्रीमती सन्तोष ठाकुर, पूर्व उप-प्रधानाचार्या, सर्वोदयविद्यालयः, पीतमपुरा, नवदेहली (सेवानिवृत्ता)
- डॉ. भास्करानन्दपाण्डेयः, प्रवक्ता राजकीय-वरिष्ठ-बालविद्यालयः, एस. पी. रोड, नांगलोई, नवदेहली (सेवानिवृत्तः)
- श्रीमती राजबत्रा, मुख्याध्यापिका, माध्यमिक-शाखा, मॉडर्न स्कूल, बाराखम्बा रोड, नवदेहली (सेवानिवृत्ता)

### सी.बी.एस.ई. समन्वयिका

- डॉ. प्रज्ञा वर्मा (संयुक्तसचिव)

# राष्ट्रियशिक्षानीतिः 2020

अध्ययनकाले भारतीयभाषाः इति विषये षष्ठीतः अष्टमीस्तरपर्यन्तम् ''एकं भारतं श्रेष्ठं भारतम्'' इत्युपक्रमान्तर्गतं देशस्य प्रत्येकं विद्यार्थी आनन्ददायकपरियोजनायां गतिविधौ वा भागग्रहणं कुर्यात्। अनया परियोजनया गतिविधिना वा छात्राः अधिकांशरूपेण प्रमुखभारतीयभाषाणाम् उल्लेखनीयायाः परस्परसमानतायाः विषये जानीयुः। तदन्तर्गतं तासां सामान्यध्वन्यात्मकरूपेण वैज्ञानिकरूपेण च व्यवस्थितवर्णमालां, लिपिं सामान्यव्याकरणसंरचनाः च अवगच्छेयुः। संस्कृतभाषातः अन्यशास्त्रीयभाषातः वा तासां शब्दावलीस्रोतसः उद्भवस्य च अन्वेषणेन सह तद्भाषाणां समृद्धेः परस्परप्रभावस्य अन्तर्भेदस्य चापि ज्ञानं भवति। ते इदमपि जानीयुः यत् कस्मिन् क्षेत्रे का भाषा भाष्यते तथा च आदिवासिभाषाणां प्रकृतिः संरचना च कीदृशी भवति। एवं भारतस्य प्रमुखभाषासु सामान्यरूपेण उच्यमानानां केषाञ्चन वाक्यानां तत्रत्यसमृद्धसाहित्यस्य च किञ्चित् परिचयं वक्तुं शक्नुयुः (आवश्यकतानुसारम् अनुवादमाध्यमेन)। एतादृग्गतिविधिना ते भारतस्य एकतायाः सुन्दरसांस्कृतिकपरम्परायाः विविधतायाः च परिचयं प्राप्नुयुः। आजीवनं ते भारतस्य अन्यभागानां जनैः सह मेलनावसरे सहजताम् अनुभवेयुः। इयं परियोजना गतिविधिः वा रुचिकरः आनन्ददायी गतिविधिः भवेत्। अपि च तत्र केनापि रूपेण मूल्याङ्कनस्य अन्तर्भावो न स्यात्। 4.16

भारतस्य शास्त्रीयभाषाणां साहित्यस्य महत्त्वं प्रासङ्गिकता सौन्दर्यञ्च कदापि हेयदृष्ट्या वीक्षितुं न शक्यन्ते। संस्कृतं संविधानस्य अष्टमानुसूच्यां वर्णिता महत्त्वपूर्णा आधुनिकभाषा विद्यते। अस्याः साहित्यम् एतादृशं विशालं विद्यते यत् लैटिन-ग्रीक-साहित्यं मेलयित्वा तुलना क्रियते चेदपि समानता न भवति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, सङ्गीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कविता, कथा, (यस्य संस्कृतज्ञानप्रणाल्यां परिगणना भवति) इत्यादिविषयाणां विशालभाण्डागारो विद्यते। एतेषां साहित्यानां लेखनं भिन्नधार्मिकजनैः सह धार्मिकेतरजनैः सामाजिकार्थिकपृष्ठभूमिवर्गीयजनैः अपि सहस्रवर्षेभ्यः लिखितं विद्यते। अनया रीत्या संस्कृतं त्रिभाषासूत्रस्य मुख्याधारविकल्पेन सह विद्यालयेषु उच्चतरशिक्षायाः सर्वेषु स्तरेषु छात्राणां कृते महत्त्वपूर्णेन समृद्धेन विकल्पेन सह प्रदीयते। संस्कृतं रोचकतया अनुभवात्मकविधिना सह समकालिकप्रासङ्गिकतानुगुणं यत्र संस्कृतज्ञानप्रणाल्याः अन्तर्भावः स्यात् विशेषरूपेण ध्वनिमाध्यमेन उच्चारणमाध्यमेन च पाठ्यते। प्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतपाठ्यपुस्तकानि 'संस्कृतेन संस्कृतपाठनम्' (एसटीएस) इति रीत्या पाठनीयानि। तदध्ययनम् आनन्ददायकं कर्तुं सरलमानकसंस्कृतस्य (एसएसएस) प्रयोगः कर्तुं शक्यते। 4.17



# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक सम्पूर्ण [1]प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य बनाने के लिए, तथा उसके समस्त नागरिकों को:

सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए
तथा उन सब में व्यक्ति की गरिमा
[2]और राष्ट्र की एकता और अखंडता
सुनिश्चित करने वाली बंधुता बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवम्बर, 1949 ई॰ को एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।

1. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

---

### भाग 4 क

# मूल कर्त्तव्य

**51 क. मूल कर्त्तव्य** – भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह –

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में सँजोए रखे और उनका पालन करे;

(ग) भारत की प्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभाव से परे हों, ऐसी प्रथाओं का त्याग करे जो स्त्रियों के सम्मान के विरुद्ध हैं;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की जिसके अंतर्गत वन, झील, नदी, और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करे जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई उंचाइयों को छू ले;

[1](ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य के लिये शिक्षा के अवसर प्रदान करे।

1. संविधान ( छयासीवां संशोधन ) अधिनियम, 2002 द्वारा प्रतिस्थापित।

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1]**SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC** and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the[2] unity and integrity of the Nation;

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949, do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

1. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "unity of the Nation" (w.e.f. 3.1.1977)

---

# THE CONSTITUTION OF INDIA

### Chapter IV A

## FUNDAMENTAL DUTIES

**ARTICLE 51A**

**Fundamental Duties -** It shall be the duty of every citizen of India-

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wild life and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

[1](k) to provide opportunities for education to his/her child or, as the case may be, ward between age of 6 and 14 years.

1. Subs, by the Constitution (Eighty-Sixth Amendment) Act. 2002.

# पाठानुक्रमणिका


| अभ्यासः | | विषयाः | | पृष्ठाङ्काः |
|---|---|---|---|---|
| पुनरावृत्तिः | – | ( वर्णानाम् उच्चारणस्थानानि, स्वरसन्धयः, व्यञ्जनसन्धयः, विसर्गसन्धयः ) | | 1-8 |
| प्रथमः अभ्यासः | – | सन्धयः | | 9-34 |
| | | ( क ) | स्वरसन्धयः | 9 |
| | | | वृद्धिः, यण्, अयादिः, पूर्वरूपम् | |
| | | ( ख ) | व्यञ्जनसन्धयः | 27 |
| | | | जश्त्वम्, परसवर्णः, छत्वम्, तुगागमः, अनुनासिकः | |
| | | ( ग ) | विसर्गसन्धिः | 25 |
| | | | उत्वम्, रत्वम्, लोपः, शत्वम्, षत्वम्, सत्वम् | |
| द्वितीयः अभ्यासः | – | समासाः | | 35-62 |
| | | ( क ) | अव्ययीभाव समासः | 37 |
| | | | उप, अनु, निर्, यथा, प्रति, सह | |
| | | ( ख ) | तत्पुरुषाः | 41 |
| | | | विभक्तितत्पुरुषः, कर्मधारयः, द्विगुः, नञ्, उपपदतत्पुरुषः | |
| | | ( ग ) | द्वन्द्वसमासः | 54 |
| | | | इतरेतरः, समाहारः, एकशेषः | |
| | | ( घ ) | बहुव्रीहिः | 58 |
| | | | समानाधिकरणम्, व्यधिकरणम् | |
| तृतीयः अभ्यासः | – | प्रत्ययाः | | 63-89 |
| | | ( क ) | कृत्प्रत्ययाः | 63 |
| | | | तव्यत्, अनीयर्, शतृ, शानच् | |
| | | ( ख ) | तद्धितप्रत्ययाः | 71 |
| | | | मतुप्, णिनि, ठक्, त्व, तल् | |
| | | ( ग ) | स्त्रीप्रत्ययौ | 83 |
| | | | टाप्, ङीप् | |
| चतुर्थः अभ्यासः | – | वाच्यम् | | 90-100 |
| | | कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् | | |
| पञ्चमः अभ्यासः | – | सङ्ख्या | | 101-103 |
| षष्ठः अभ्यासः | – | समयः | | 104-106 |

| | | |
|---|---|---|
| सप्तमः अभ्यासः - | अव्ययानि | 107-116 |
| अष्टमः अभ्यासः - | अशुद्धिसंशोधनम् | 117-120 |
| नवमः अभ्यासः - | रचनात्मककार्यम् | 121-139 |
| | (क) चित्रवर्णनम् | 121 |
| | (ख) अनुच्छेदलेखनम् | 125 |
| | (ग) पत्रलेखनम् | 126 |
| | (घ) संवादलेखनम् | 132 |
| | (ङ) कथापूर्तिः | 137 |
| दशमः अभ्यासः - | अपठितावबोधनम् | 140 |

# वाग्वैभवम्

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्॥

# वन्दना

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

शुक्लां ब्रह्मविचारसारपरमाम् आद्यां जगद्व्यापिनीम्
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

